॥ अथ वेदोक्तशिवार्चनपद्धतिप्रारंभः ॥

श्रीगणेशाय नमः ॥ श्रीगुरवे नमः ॥ हस्तौपादौ प्रक्षाल्य ॥ आस
नारोहणम् ॥ ॐ भूर्भुवःस्वःइत्याचनम् ॥ ॐ नमःशिवायेतित्रिवारं
पठेत् ॥ त्र्यम्बकमितिविभूतिधारणम् ॥ पीठलिंगस्थापनम् ॥ गणप
त्यादिमंडलेअक्षतपुंजस्थापनम् ॥ ततःस्वस्तिवाचनम् ॥ प्रतिज्ञासं
कल्पः ॥ गणपतिपूजनम् ॥ ततोवरणसंकल्पः ॥ ततःनंदीवीरभद्रौस्वा
मिकार्तिकंकुबेरंकीर्तिमुखंचपूजयेत् ॥ ॐस्वुस्तिनुऽइन्द्रोंवृद्धश्श्रंवाः
स्वुतिनंःपूषाव्विुश्श्ववेदाः ॥ स्वुतिनुस्ताक्ष्योंऽरिंष्टनेमिःस्वुस्ति
नोबृहुस्पतिर्दधातु ॥ १ ॥ पयंःपृथिव्यांम्पयुओषधीषुपयोंदिव्यू

न्तरिक्षेपयोधाः ॥ पयस्वतीःप्रदिशःसंतुमह्यम् ॥ २ ॥ विष्णोरर
टमसिविष्णोःश्नप्त्रेस्थोविष्णोःस्यूरसिविष्णोर्ध्रुवोसि ॥ वैष्णवम
सिविष्णवेत्त्वा ॥ ३ ॥ अग्निर्देवतावातोदेवतासूर्य्योदेवताचन्द्रमा
देवतावसवोदेवतारुद्रादेवतादित्यादेवतामरुतोदेवताविश्वेदेवा देव
ताबृहस्पतिर्देवतेन्द्रोदेवतावरुणोदेवता ॥ ४ ॥ द्यौःशान्तिरन्तरिक्षꣳ
शान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः ॥ वनस्पतयःशा
न्तिर्विश्वेदेवाःशान्तिर्ब्रह्मशान्तिःसर्वꣳ शान्तिःशान्तिरेवशान्तिःसामा
शान्तिरेधि ॥ ५ ॥ सुशान्तिर्भवतु ॥ ॐविश्वानिदेवसवितर्दुरि

तानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव ॥ ६ ॥ इमारुद्रायतवसेकपर्दि
नक्षयद्वीरायप्रभरामहेमतीः ॥ यथाशमसद्विपदेचतुष्पदेविश्वम्पु
ष्टङ्ग्रामेऽअस्मिन्ननातुरम् ॥७॥ एतन्तेदेवसवितर्यज्ञम्प्राहुर्बृहस्पत
येब्रह्मणे ॥ तेनयज्ञमवतेनयज्ञपतिन्तेनमामव ॥ ८ ॥ मनोजूतिर्जु
षतामाज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्वरिष्टँयज्ञꣳ समिमन्द
धातु ॥ विश्वेदेवासऽइहमादयन्तामो ३ म्प्रतिष्ठ ॥ ९ ॥ एषवैप्रति
ष्ठानामयज्ञोयत्रैतेनयज्ञेनयजन्तेसर्वमेवप्रतिष्ठितम्भवति ॥ १० ॥
गणानान्त्वा गणपतिꣳहवामहेप्रियाणान्त्वाप्रियपतिꣳ हवामहे

निधीनान्त्वांनिधिपतिंठंहवामहेव्वंसोमम ॥ आहमंजानिगर्ब्भधमा
त्वमंजासिगर्ब्भधम् ॥ ११ ॥ नमोंगुणेभ्योंगुणपंतिभ्यश्श्ववो
नमो नमोव्व्रातेभ्योव्व्रातंपतिभ्यश्श्ववोनमोनमो गृत्त्सेभ्यो गृत्त्संप
तिभ्यश्श्ववोनमोनमोव्विरूपेभ्योव्विश्श्वरूपेभ्यश्श्वव्वोनमः ॥१२॥
सुमुखश्चैकदंतश्च कपिलो गजकर्णकः ॥ लंबोदरश्च विकटो
विघ्ननाशो विनायकः ॥१३॥ धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः॥
द्वादशैतानिनामानियःपठेच्छृणुयादपि ॥ १४ ॥ विद्यारम्भेविवाहे
चप्रवेशेनिर्गमेतथा ॥ संग्रामेसंकटेचैवविघ्नस्तस्यनजायते ॥ १५ ॥

ॐ भूर्भुवः स्वः अत्रमंडले इहागच्छसुप्रतिष्ठोवरदोभवममपूजां गृहाण श्रीगणाधिपतयेनमः ॥ अक्षतान्क्षिपेत् ॥ ॐतत्सदद्यब्रह्मणोद्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरे अष्टाविंशतितमे युगेकलौप्रथमचरणे जम्बुद्वीपे भरतखंडे आर्यावर्त्तैकदेशे अमुकसंवत्सरे अमुकऋतौ अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे यथायोगकरणमुहूर्त्त वर्त्तमाने अमुकगोत्रः अमुकशर्मा श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामः चतुर्वर्गफलप्राप्त्यर्थं प्रदोषादियामचतुष्टयाधिकरणकरुद्रीपाठसहितं चतुष्कृत्वो नार्म्मदशिवलिंगपूजनमहंक

रिष्ये । तदंगत्वेनगणपत्यादिपूजनंचकरिष्ये ॥ततोग्निर्विश्वानिदेवसवि
तारीतिपंचप्रतिष्ठामंत्रान्पठेत् ॥ ॐगणानान्त्वेतिमंत्रेणावाहनपुष्पा
सनपाद्यार्घ्याचमनीयस्नानीयपुनराचमनीयवस्त्रयज्ञोपवीतगन्धाक्षत
पुष्पधूपदीपनैवेद्यफलतांबूलनमस्कारप्रदक्षिणाजपा इति षोडशोपचा
रैर्गणपतिंपूजयेत् ॥ मूलमंत्रस्य जपः ॥ ततः प्रार्थना ॥ नमोगणे
भ्यः॰सुमुखश्चैकदंतश्चवक्रतुंडंपठेदितिगणपतिपूजनम् ॥ ततोवरण
संकल्पः ॥ ॐतत्सदद्यब्रह्मणोद्वितीयपरार्द्धेश्रीश्वेतवाराहकल्पेवैव
स्वतमन्वंतरे अष्टाविंशतितमेयुगेकलौप्रथमचरणेजंबूद्वीपे भरतखंडे

आर्यावर्त्तै अमुकसंवत्सरे अमुकऋतौ अमुकमासे अमुकपक्षे अमुक तिथौ अमुकवासरेयथायोगकरणमुहूर्त्तै वर्तमाने अमुकगोत्रःअमुक शर्मा श्रुतिस्मृतिपुराणोक्तफलप्राप्तिकामः चतुर्वर्गफलप्राप्त्यर्थं कर्त्त व्यप्रदोषादियामचष्टतुयाधिकरणकरुद्रीपाठसहितं चतुष्कृत्वो ना र्म्मदाशिवलिंगपूजनं ब्राह्मणद्वारा कारयितुमेभिर्वरणद्रव्यैर्यथानाम गोत्रान्यथापरिमितब्राह्मणानहं वृणे ॥ व्रतेनंदीक्षामांप्नोतिदीक्षयां प्नोतिदक्षिणाम् ॥ दक्षिणाश्रद्धामांप्नोतिश्श्रद्धयांसुत्यमांप्यते ॥ इति ब्राह्मणो वदेत्॥ ततःनंदीश्वरपूजनमाह ॥ आयङ्गौः पृश्निरक्र

मीदसंदन्मातरंम्पुरः ॥ पितरंश्चप्प्रुयन्त्स्वंः॥ षोडशोपचारैर्नंदीश्वरं
पूजयेत् ॥ ततः प्रार्थना ॥ प्रैतुंब्राजीकनिंक्रदुन्नानंदुद्रासंभुःपत्त्वां ॥
भरंन्नाग्निम्पुंरीष्युम्मापाद्यायुंषःपुरा ॥ इतिनंदीश्वरंपूजयेत् ॥ १ ॥
ततोवीरभद्रपूजनम् ॥ भुद्रङ्कर्णोभिःशृणुयामंदेवाभुद्रम्पंश्येमाक्ष
भिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाᳫंसंस्तनूभिर्व्यशेमहिदेवाहितुंयदायुः
॥ षोडशोपचारैर्वीरभद्रं पूजयेत् ॥ ततः प्रार्थना ॥ भुद्रोनोऽअग्निरा
हुतोभुद्रारातिःसुंभगभुद्रोऽअंध्वुरः ॥ भद्राउतप्प्रशंस्तयः ॥ इतिवी
रभद्रं पूजयेत् ॥ ततः स्वामिकार्तिकपूजनमाह ॥ यदक्रंन्दःप्प्रथुम

आंयमानऽउद्यन्त्समुद्रादुतवापुरीषात् ॥ श्येनस्यपक्षाहरिणस्यबा
हूऽउपस्तुत्यम्महिजातन्तेऽअर्वन् ॥ षोडशोपचारैःस्वामिकार्तिकंपू
जयेत्॥ ततः प्रार्थना ॥ यत्रबाणाःसम्पतन्तिकुमाराविशिखाऽइव॥
तन्नऽइन्द्रोबृहस्पतिरदितिः शर्म्मयच्छतुविश्श्वाहाशर्म्मयच्छतु ॥ इ
तिस्वामिकार्तिकंप्रार्थयेत् ॥ ततःकुबेरपूजनमाह॥कुविदङ्गयवमन्तो
यवंचिद्यथादान्त्यनुपूर्वंवियूय ॥ इहेहैषाङ्कृणुहिभोजनानियेबर्हि
षोनमऽउक्तिं यजन्ति ॥ षोडशोपचारैःकुबेरंपूजयेत् ॥ ततःप्रार्थना
॥ वयर्ठसोमव्रतेतवमनस्तनूषुबिभ्रत ÷ ॥ प्रजावन्त ÷ सचेमहि॥

इतिकुबेरंप्रार्थयेत् ॥ ततःकीर्तिमुखपूजनमाह ॥ असवेस्वाहावसवे
स्वाहाविभुवेस्वाहाविवस्वते स्वाहागणश्रियेस्वाहागणपतये स्वा
हाभिभुवेस्वाहाधिपतयेस्वाहा शूषायस्वाहासंसर्पाय स्वाहाच
न्द्रायस्वाहाज्ज्योतिषेस्वाहामलिम्लुचायस्वाहादिवापतयेस्वाहा॥
षोडशोपचारैःकीर्तिमुखंपूजयेत् ॥ ततःप्रार्थना ॥ ओजश्चमे
सहश्चमऽआत्माचमेतनूश्चमेशर्म्मचमेङ्गानिचमेस्थीनिचमे परू
ᳪंषिचमेशरीराणिचमऽआयुश्चमेजराचमेयज्ञेनकल्पन्ताम् ॥ इ
तिकीर्तिमुखंप्रार्थयेत्॥ अथात्मविन्यासः ॥ १ ॥ यातेरुद्रशिवातनूर

घोरापापकाशिनी ॥ तयानस्तन्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ शिखायाम् ॥ १ ॥ अस्मिन्महत्यर्णवेन्तरिक्षेभवाऽअधि ॥ तेषाᳬसहस्रयोजनेवधन्वानितन्मसि ॥ शिरसि ॥ २ ॥ असङ्ख्यातासहस्राणियेरुद्राऽअधिभूम्म्याम् ॥ तेषाᳬसहस्रयोजनेवधन्वानितन्मसि ॥ ललाटे ॥ ३ ॥ वयᳬसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावन्तᳬसचेमहि ॥ भ्रुवोर्मध्ये ॥ ४ ॥ त्र्यम्बकँयजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् ॥ नेत्रयोः ॥ ५ ॥ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निःस्वाहासूर्य्योज्ज्योति

२

ज्ज्योतिः सूर्य्यः स्वाहा ॥ अग्निर्व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा सूर्य्यो व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा ॥ ज्योतिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा ॥ तृतीयनेत्रे ॥ ६ ॥ नमः स्रुत्त्याय च पथ्याय च नमः काट्याय च नीप्प्याय च नमः कुल्ल्याय च सरस्याय च नमो नादेयाय च व्वैशन्ताय च ॥ कर्णयोः ॥ ७ ॥ मानस्तोके तनये मान ऽआयुषि मानो गोषु मानो ऽअश्वेषु रीरिषः ॥ मानो व्वीरान्रुद्र भामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥ नासिकयोः ॥ ८ ॥ अवतत्य धनुष्ट्वꣳ सहस्राक्ष शतेषुधे ॥ निशीर्य्य शल्ल्यानां मुखा शिवो नः सुमना भव ॥ मुखे ॥ ९ ॥ नमो व्वश्वते

परिवृश्चंतेस्तायूनाम्पतंयेनमोनमौनिषङ्गिणंऽइषुधिमते तस्कंराणा
म्पतंयेनमोनमंःसृकायिभ्योजिघांसद्भ्योमुष्णताम्पतंये नमोन
मौसिमद्भ्योनक्तुश्चरंद्भ्योविकुन्तानांपतंयेनमंः ॥ ग्रीवायाम्॥१०॥
नीलंग्ग्रीवाःशितिकण्ठादिवंरुद्राऽउपंश्श्रिताः ॥ तेषांसहस्त्रयो
जनेवधन्वांनितन्नमसि ॥ कंठदेशे ॥ ११ ॥ नमंस्तुऽआयुधायानां
ततायधृष्णवें ॥ उभाभ्यांमुततेनमोबाहुभ्यान्तवधन्वंने ॥ बाह्वोः
॥ १२ ॥ येतीर्त्थानिं प्प्रचरंन्ति सृकाहंस्तांनिषङ्गिणंः ॥ तेषां
सहस्त्रयोजनेवधन्वांनितन्नमासि ॥ हस्तयोः ॥ १३ ॥ नमोंज्ज्येष्ठा

यंचकनिष्ठायचुनमः पूर्वजायचापरजायचुनमो मध्यमायं चापग
ल्भायंचुनमोजघन्यायचबुध्न्यायच ॥ अंगुलिषु ॥ १४ ॥ नमः
पुर्णायंच पर्णशदायंचुनमऽउद्गुरमाणायचाभिघ्नतेचु नमऽआखिदते
चप्प्रखिदतेचुनमऽइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमोनमोवः किरिके
भ्योदेवानार्ठहृदयेभ्यो नमोविचिन्वत्केभ्योनमोविक्षिणत्के
भ्योनमऽआनिर्हतेभ्यः ॥ हृदये ॥१५॥ नमोगुणेभ्योगुणपतिभ्यश्च
वोनमोनमोव्रातेभ्योव्रातपतिभ्यश्चवोनमो नमो गृत्सेभ्यो
गृत्संपतिभ्यश्चवोनमोनमोविरूपेभ्यो विश्वरूपेभ्यश्चवो नमः॥

पृष्ठे ॥ १६ ॥ विकिरिद्रविलोहितनमस्तेऽअस्तु भगवः ॥ यास्ते
सहस्रꣳहेतयोन्यमस्मन्निवपन्तुताः ॥ उदरे ॥ १७ ॥ नमःश
म्भुवायचमयोभुवायचनमःशंकरायच मयस्करायचनमःशिवा
यचशिवतरायच ॥ दक्षिणकुक्षौ ॥ १८ ॥ द्रापेऽअन्धसस्पतेदरिद्र
नीललोहित ॥ आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मोचनः
किञ्चनाममत् ॥ वामकुक्षौ ॥ १९ ॥ हिरण्यगर्भःसमवर्त्तताग्रे भूत
स्यजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवा
यहविषाविधेम ॥ नाभौ ॥ २० ॥ मीढुष्टमशिवतमशिवोनःसुमना

भव ॥ पुरमेव्वृक्षऽआयुंधन्निधायकृत्तिंव्वसानऽआचंरपिनाकुम्बिब्भ्र
दागंहि ॥ कटयाम् ॥ २१ ॥ शिवोनामासिस्वधितिस्तेपितानमंस्तेऽ
अस्तुमामाहिंठ्ठंसीः ॥ निवर्त्तयाम्म्यायुंषेन्नाद्यायप्प्रजननायराय
स्प्पोषायसुप्प्रजास्त्वायंसुवीर्य्यांय ॥ लिंगे ॥ २२ ॥ इमारुद्रायंत
वसेंकपर्द्दिनेंक्षयद्धीरायप्प्रभंरामहेमतीः ॥ यथाशमसंद्विपदेचतुंष्प्प
देविश्वंपुष्टंग्रामेंऽअस्मिन्ननातुरम् ॥ गुह्ये ॥ २३ ॥ इषेत्त्वोर्ज्जेत्वा
व्वायवंस्थदेवोवंः सविता प्प्रार्प्पयतुश्रेष्ठतमाय कर्म्मणऽआप्प्या
यदूघ्वमग्घ्न्याऽइन्द्राय भागम्प्रजावंतीरनमीवाऽअंयक्ष्मावंस्तेनऽ

ईशतुमाघशर्ठंसुोघ्रुवाऽअुस्मिन्मन्न्गोपंतौ स्यातबुह्वीर्य्यजंमानस्य
पुशून्पाहि ॥ वृषणयोः ॥ २४ ॥ मानोमुहान्तंमुतमानोऽर्भुक
म्मानुऽउक्षन्तमुतमानंऽउक्षितम् ॥ मानोंवधीःपितरम्मोतमातरं
म्मानंःप्प्रियास्तुन्न्वोरुद्ररीरिषः ॥ ऊर्वोः ॥ २५ ॥ एुषतेंरुद्रभागःसु
हस्वस्राम्बिकयातञ्जुषस्वस्वाहैषतेंरुद्रभागऽआखुस्तेंपुशुः ॥ जा
न्वोः ॥ २६ ॥ नमोज्ज्येष्ठायंचकनिष्ठायंचुनमंःपूर्व्वजायंचापरजा
यचुनमोमद्ध्यमायंचापगुल्भायंचुनमोजघुन्न्यायचबुद्ध्न्यायच ॥
जंघयोः ॥ २७ ॥ नमोह्रस्वायंचवामुनायंचुनमोवृद्धायंचसुवृधेचुन

मोग्र्यायचप्प्रथुमायंच ॥ गुल्फयोः ॥ २८ ॥ येपुथाम्पंथिुरक्षंयऽ
ऐलबृदाऽआंयुर्ख्युधंः ॥ तेषांछंसहस्त्रयोजुनेवुधन्न्वांनितन्न्मसि ॥
पादयोः ॥ २९ ॥ अद्धंचवोचदाधिवुक्ताप्प्रंथुमोदैव्योंभिुषक् ॥ अहींँ
श्चुसर्व्वांञ्जम्भयुन्त्सर्व्वांश्च्चयातुधान्न्युोधुराचीःपरांसुव॥कवचम् ॥
॥ ३० ॥ नमों बिुल्म्मिनेंचकवुाचिनेंचुनमोंव्वुर्म्मिणेंचव्वरुथिनेंचुन
मंःश्श्रुतांयचश्श्रुतसेुनायंचुनमोंदुन्दुब्भ्युायचाहनुन्न्युायच्च ॥ अस्त्रम्
॥ ३१ ॥ व्विज्ज्युन्धनुंःकपुर्दिनोुाव्विशंल्ल्युोबाणंवा ऽँुत ॥ अनें
शन्नस्युषाऽइषंवऽआुभरंस्यानिषुङ्गधिंः ॥ धनुः ॥ ३२ ॥ यत्रंबाुणाः

सुम्पतन्तिकुमाराविंशिषाऽइव ॥ तन्नुऽइन्द्रोबृहस्पतिरदितिःशर्म्म
यच्छतुविश्वाहाशर्म्मयच्छतु ॥ बाणः ॥ ३३ ॥ विकिरिद्रविलो
हितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रꣳहेतयोन्न्यमस्मिन्निवपन्तु
ताः ॥ खड्गः ॥ ३४ ॥ यऽएतावन्तश्चभूयाꣳसश्चदिशोरुद्रावितस्थिरे
॥ तेषाꣳसहस्रयोजनेवधन्न्वानितन्न्मसि ॥ दिग्बन्धनम् ॥
॥ ३५ ॥ एवंन्यासविधिंकृत्वाशिवोहमितिभावयेत् ॥एवंशिवलिंगेऽ
पिन्यासविधिंकुर्यात् ॥ मानोमहान्तमुतमानोऽअर्भकम्मानुऽउक्ष
न्तमुतमानऽउक्षितम् ॥ मानोवधीःपितरम्मोतमातरम्मानःप्प्रिया

स्तुन्न्वोरुद्ररीरिषः ॥ आवाहनम् ॥ १ ॥ यातेरुद्रशिवातनूरघोरापाप
काशिनी ॥ तयानस्तन्न्वाशन्तमयागिरिशन्ताभिचाकशीहि ॥ पु
ष्पासनम् ॥ २ ॥ यामिषुङ्गिरिशन्तहस्तेबिभर्ष्यस्तवे॥ शिवाङ्गिरित्र
तांकुरुमाहिंसीःपुरुषञ्जगत् ॥ पाद्यम् ॥ ३ ॥ शिवेनवचसात्वागि
रिशाच्छावदामसि ॥ यथानःसर्वमिज्जगदयक्ष्मसुमनाऽअसत् ॥
॥ अर्घः ॥ ४॥ अध्यवोचदधिवक्ताप्रथमोदैव्योभिषक् ॥ अहींश्च
सर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्योधराचीःपरासुव । आचमनम् ॥
॥ ५ ॥ असौयस्ताम्रोऽअरुणऽउतबभ्रुःसुमङ्गलः ॥ येचैनरुद्राऽ

अभितौदिक्षुश्रिताः सहस्रशोवैषाᳯहेडऽइमहे ॥ स्नानम् ॥ ६ ॥ अ
थपंचामृतस्नानम् ॥ आप्प्यायस्वेतिगौतमऋषिः सोमोदेवतागाय
त्रीछन्दःक्षीरस्नानेविनियोगः ॥ आप्प्यायस्वसमेतुतेविश्वतः सो
मवृष्ण्यम् ॥ भवाव्वाजस्यसंगथे ॥ ७ ॥ पयः पृथिव्याम्पयऽओषं
धीषुपयोदिव्यन्तरिक्षेपयोधाः ॥ पयस्वतीः प्प्रदिशः सन्तुमह्यम् ॥
पयःस्नानम् ॥ ८ ॥ असौयस्ताम्म्रोऽअरुणऽउतबभ्भ्रुः सुमङ्गलः ॥
येचैनᳯरुद्राअभितोदिक्षुश्रिताः सहस्रशोवैषाᳯहेडईमहे ॥ ९ ॥ दे
वस्यत्त्वासवितुः प्प्रसवेश्विनोर्बाहुभ्भ्यांम्पूष्णोहस्ताभ्भ्याम् ॥ शुद्ध

स्नानम् ॥ १० ॥ दधिक्राव्णोइत्यस्यदधिक्राव्णऋषिः सुरभिर्दैव
ताऽनुष्टुप्छन्दोदधिस्नानेविनियोगः ॥ दधिक्राव्णोऽकारिषञ्जि
ष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूंषितारिषत्
॥ दधिस्नानम् ॥११॥ असौयं० ॥१२॥ देवस्यत्वा० ॥ शुद्धस्नानम्
॥ १३ ॥ शुक्रमसीत्यस्ययजुषःप्रजापतिर्ऋषिराज्यंदेवताऽनुष्टुप्छं
दःआज्यस्नानेविनियोगः ॥ शुक्रमसिज्ज्योतिरसितेजोसि ॥ घृतवं
तीभुवनानामभिश्रियोर्वीपृथ्वीमधुदुघेसुपेशसा ॥ द्यावापृथिवी
वरुणस्यधर्मणाविष्कभितेऽअजरेभूरिरेतसा ॥ १४ ॥ घृतंघृतपा

वानःपिबतुव्वसाँव्वसापावानःपिबतान्तरिक्षंस्यहव्विरसिस्वाहा॥दिशः
प्प्रदिशऽआदिशोव्विदिशऽउद्दिशोदिग्भ्यः स्वाहा ॥ घृतस्नानम् ॥
॥ १५ ॥ असायः०॥ १६ ॥ देवस्यत्वा०॥ शुद्धस्नानम् ॥ १७ ॥मधु
व्वाताऽइतिमंत्रस्यगौतमऋषिर्मधुर्देवतागायत्रीछंदोमधुस्नाने विनि
योगः॥मधुव्वाताऽऋतायतेमधुंक्षरन्तिसिन्धवः ॥ माद्ध्वीर्न्नःसन्त्वोषं
धीः ॥ १८ ॥ मधुनक्तमुतोषसोमधुमत्पार्थिवꣳरजः ॥ मधुद्यौर
स्तुनःपिता ॥ १९ ॥ मधुमान्नोव्वनस्पतिर्म्मधुमाँ२ऽअस्तुसूर्य्यः ॥
माद्ध्वीर्ग्गावोभवंतुनः ॥ मधुस्नानम् ॥ २० ॥ असौयः ० ॥ २१ ॥

देवस्यत्वा ० शुद्धस्नानम् ॥ २२ ॥ स्वादुःपवस्वेतिमंत्रस्यवेणऋषिः सोमात्मिकाशर्करादेवता जगतीछंदः शर्करास्नानेविनियोगः॥ स्वादुःपवस्वदिव्यायजन्म्मनेस्वादुरिन्द्रायसुहवीतुनाम्म्ने ॥स्वादुर्म्मित्रायवरुणायव्वायवे बृहस्पतयेमधुमाꣳ॥ऽअदाभ्यः ॥ २३॥ अपाꣳरसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम् ॥ अपाꣳरसस्ययोरसस्तँव्वोगृह्णाम्म्युत्तममुपयामगृहीतोसीन्द्रायत्वाजुष्टं गृह्णाम्येषते योनिरिंद्रायत्वाजुष्टतमम्॥शर्करास्नानम्॥२४॥असाय:० ॥२५॥देवस्यत्वा० शुद्धस्नानम् ॥ २६ ॥ अद्ध्यवोचदधिवक्ताप्प्रथमोदैव्योभिषक् ॥

अहींश्चसर्वाञ्जम्भयन्त्सर्वाँश्चयातुधान्न्योधराचीःपरासुव ॥ पुनरा
चमनीयम् ॥२७॥ असौयोवसर्पतिनीलग्ग्रीवोविलोहितः ॥ उतैनं
गोपाऽअदृशन्नदृशन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥ वस्त्रम् ॥ २८ ॥
परिधास्यैयशोधास्यैदीर्घायुत्वायजरदष्टिरस्मि शतञ्च जीवामिशर
दःपुरूचीरायस्पोषमभिसंव्ययिष्ये ॥ वस्त्रेणकटिबन्धनम् ॥२९॥
नमोस्तुनीलग्ग्रीवायसहस्राक्षायमीढुषे ॥ अथो येअस्यसत्त्वानो
हन्तेभ्योकरन्नमः ॥ यज्ञोपवीतमितिमंत्रस्यपरमेष्ठीऋषिस्त्रिष्टुप्छं
दोलिंगोक्तादेवतायज्ञोपवीतपरिधाने विनियोगः ॥ यज्ञोपवीतंपरमं

पवित्रंप्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञो
पवीतंबलमस्तुतेजः ॥ यज्ञोपवीतम् ॥ ३० ॥ प्रमुंञ्चधन्न्वनुस्त्वमुभ
योरात्न्यौंज्ज्यांम् ॥ याश्चतेहस्तऽइषवःपराताभगवोव्वप ॥ ३१ ॥
गन्धोहैवास्यसुगन्धितेजनन्तद्यत्सुगन्धितेजनम्भवति गन्धेनैवैन
मेतत्समर्द्धयाति॥गंधः ॥३२॥ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत ॥
अस्तौषतस्वभानवोव्विप्प्रानविष्ठयामतीयोजान्निन्द्रतेहरी ॥ अक्ष
ताः ॥ ३३ ॥ विज्ज्यन्धनुःकपर्द्दिनोव्विशल्ल्योबाणवाँऽउत ॥
अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः ॥ ३४ ॥ यांःफलिनीर्य्या

ऽअंफलाऽअंपुष्पायाश्चंपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमु
ञ्चुन्त्वंहसः ॥ पुष्पाणि ॥ ३५ ॥ नमोबिल्मिनेचकवचिनेचन
मोवर्मिणे चवरुथिनेचनमः श्श्रुतायेच श्रुतसेनायेच नमो दुन्दु
भ्यायचाहनन्न्यायच ॥ ३६ ॥ अमृतोद्भवंश्रीवृक्षंशङ्करस्यसदाप्रिय।
तत्तेशम्भोप्रयच्छामिबिल्वपत्रंसुरेश्वर ॥ त्रिशाखैर्बिल्वपत्रैश्चअच्छि
द्रैः कोमलैः शुभैः ॥ तवपूजांकरिष्यामिअर्चयेपरमेश्वर ॥ गृहाणबि
ल्वपत्राणिसपुष्पाणिमहेश्वर ॥ सुगन्धीनिभवानीशशिवत्वंकुसुम
प्रिय ॥ बिल्वपत्राणि ॥ ३७ ॥ स्रातेहेतिम्मीढुष्टमुहस्तेबभूवंतेधनुः ॥

तयास्म्मान्न्विश्श्वतुस्त्वमंयक्ष्मयापरिंभुज ॥ ३८ ॥ धूरंसिधूर्व्वधू
र्व्वन्तन्धूर्व्वतंयोस्म्मान्धूर्व्वतितन्धूर्व्वयंव्वयन्धूर्वामः ॥ देवानांमसिव्व
ह्नितमर्ठंसस्नितमम्पप्रितमञ्जुष्टंतमन्देवहूतंमम्॥धूपः॥३९॥ परिं
तेधन्न्वंनोहेतिरस्म्मान्न्वृणक्तुविश्श्वतंः ॥ अथोयऽइषुधिस्तवारेअ
स्म्मान्निधेहितम् ॥ ४० ॥ अग्निर्ज्ज्योतिर्ज्ज्योतिरग्निःस्वाहासूर्य्यो
ज्योतिर्ज्ज्योतिःसूर्य्यःस्वाहा ॥ अग्निर्व्वर्च्चोज्ज्योतिर्व्वर्च्चःस्वाहा ॥
सूर्य्योवर्च्चोज्ज्योतिर्व्वर्च्चः स्वाहा ॥ ज्योतिःसूर्य्यः सूर्य्योज्ज्योतिः
स्वाहा ॥ दीपः ॥ ४१ ॥ अवतत्यधनुष्ट्वर्ठंसहस्राक्षशतेषुधे ॥ निशी

ष्यँशुल्यानांमुखांशिवोनंः सुमनांभव ॥ ४२ ॥ अन्नपतेन्नस्यनोदेह्य
नमीवस्यंशुष्मिणंः ॥ प्रप्रंदातारंन्तारिषऽउर्ज्जंन्नोधेहि द्विपदेचतुंष्प
दे ॥ नैवेद्यम् ॥ ४३ ॥ अध्यंवोचदधिवक्ताप्प्रंथमोदैव्योंभिषक् ॥
अहींश्चसर्व्वांञ्जम्भयन्त्सर्व्वांश्चयातुधान्न्योधराचींःपरांसुव ॥ आच
मनम् ॥ ४४ ॥ नमस्तऽआयुंधायानांततायधृष्णवें ॥ उभाभ्यांमु
ततेनमोंबाहुभ्यान्तवधन्वंने ॥ मुखवासः ॥ ४५ ॥ नमः पर्णायंचप
र्णशदायंचनमंऽउद्गुरमांणायचाभिघ्नतेच नमंऽआखिदतेचं प्प्राखिद
तेचनमंऽइषुकृद्भ्योंधनुष्कृद्भ्यंश्चवोनमोनमोंवःकिरिकेभ्योंदेवानाठं

हृदयेभ्योनमोंव्विचिन्न्वत्केभ्योनमऽआनिर्हतेभ्यः ॥ तांबूलम् ॥ ४६ ॥ हिरण्यगर्भःसमवर्त्तताग्ग्रेभूतस्यंजातःपतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाव्विधेम ॥ दक्षिणा ॥ ४७ ॥ अथध्यानन् ॥ शुद्धस्फटिकसंकाशंत्रिनेत्रंपंचवक्त्रकम् ॥ गंगाधरंदशभुजंसर्वाभरणभूषितम् ॥४८॥ नीलग्रीवंशशांकांकंनागयज्ञोपवीतिनम् ॥ व्याघ्रचर्म्मोत्तरीयंचवरेण्यमभयप्रदम् ॥ ४९ ॥ कमंडल्वक्षसूत्राभ्यामान्वितंशूलपाणिनम् ॥ ज्वलंतं पिङ्गलजटाशिखामुद्योतकारिणम् ॥५०॥ अमृतेनाप्लुतंहृष्टमुमादेहार्द्धधारिणम् ॥

दिव्यसिंहासनासीनंदिव्यभोगसमान्वितम् ॥ ५१ ॥ दिग्देवतासमा
युक्तंसुरासुरनमस्कृतम् ॥ नित्यंचशाश्वतंशुद्धंध्रुवमक्षरमव्ययम् ॥
सर्वव्यापिनमीशानमेवंवैविश्वरूपिणम् ॥ गौरींचतुर्भुजां चंडींत्रिने
त्रांमुकुटोज्ज्वलाम् ॥ पद्मदर्पणहस्तांचवरदाभयहस्तकाम्॥दिव्यव
स्त्रपरीधानांदिव्यालंकारभूषिताम् ॥ प्रसन्नवदनांध्यायेच्छिवोत्संगे
तुवामतः ॥ एवंध्यात्वाद्विजः सम्यक्ततोयजनमानरभेत ॥ ५२ ॥
पुष्पोदकेनतर्प्पयेत् ॥ॐ भवंदेवंतर्प्पयामि॥ १॥ॐ शर्वदेवंतर्प्पयामि
॥ २ ॥ ॐ ईशानंदेवंतर्प्पयामि॥ ३॥ॐ पशुपतिंदेवंतर्प्पयामि ॥ ४ ॥

ॐ रुद्रंदेवंतर्प्पयामि ॥५॥ॐ उग्रंदेवंतर्प्पयामि ॥ ६ ॥ ॐ भीमंदेवंतर्प्पयामि ॥ ७ ॥ ॐ महांतंदेवंतर्प्पयामि ॥ ८ ॥ ॐ देवदेवंतर्प्पयामि ॥ ९ ॥ ॐ ज्येष्ठायनमः पुनराचमनीयम् ॥ १ ॥ ॐ श्रेष्ठायनमः ॥ मधुपर्कः ॥२॥ मधुपर्कंगृहाणेशसर्वदामधुपर्कपः ॥ मधुपर्कप्रदानेन प्रीतोभवमहेश्वर ॥ २ ॥ ॐ कालायनमः ॥ गंधः ॥ ३ ॥ ॐ कलविकरणायनमः । पुष्पाणि॥४॥ॐ सर्वभूतदमनायनमः॥धूपः ॥५॥ ॐ मनोन्मनायनमः ॥ दीपः ॥ ६॥ ॐ भवोद्भवायनमः नैवेद्यम् ॥ ७ ॥ अथाष्टौपुष्पाञ्जलयः ॥ ॐ भवायदेवायनमः ॥१॥ ॐ शर्वायदेवाय

नमः ॥ २ ॥ ॐ ईशानायदेवायनमः ॥ ३ ॥ ॐ पशुपतयेदेवायनमः ॥ ४ ॥ ॐरुद्रायदेवायनमः ॥ ५ ॥ ॐउग्रायदेवायनमः ॥ ६ ॥ ॐभीमायदेवायनमः ॥ ७ ॥ ॐमहतेदेवायनमः ॥ ८ ॥ ॐभवस्यदेवस्यपत्न्यैनमः ॥ १ ॥ ॐशर्वस्यदेवस्यपत्न्यै नमः ॥ २ ॥ ॐईशानस्यदेवस्यपत्न्यैनमः ॥ ३ ॥ ॐ पशुपतेर्देवस्यपत्न्यैनमः ॥ ४ ॥ ॐरुद्रस्यदेवस्यपत्न्यैनमः ॥ ५॥ ॐउग्रस्यदेवस्यपत्न्यैनमः ॥ ६ ॥ ॐभीमस्यदेवस्यपत्न्यैनमः॥७॥ ॐ महतोदेवस्यपत्न्यैनमः ॥८॥ॐ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः ॥ सर्वेभ्यःसर्वशर्वेभ्योनमस्तेस्तुरु

द्ररूपेभ्यः ॥ १ ॥ ॐतत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नोरुद्रः
प्रचोदयात् ॥२ ॥ ॐशर्वायक्षितिमूर्तयेनमः ॥ १ ॥ ॐ भवायजल
मूर्त्तयेनमः ॥ २ ॥ ॐरुद्रायाग्निमूर्त्तयेनमः ॥ ३ ॥ ॐउग्रायवायुमूर्त्त
येनमः ॥ ४ ॥ ॐ भीमायाकाशमूर्त्तयेनमः ॥ ५ ॥ ॐ पशुपतयेयज
मानमूर्त्तयेनमः ॥ ६ ॥ ॐ महादेवायसोममूर्त्तयेनमः ॥ ७ ॥ ॐ
ईशानायसूर्य्यमूर्त्तयेनमः ॥ ८ ॥ एवंसंपूज्य ततः सहस्रघटैः स्नप
नम् ॥ ॐ नमः शिवायेतिजपम् ॥ ॐ अस्य श्रीषडक्षरशिवमंत्रस्य
वामदेवऋषिः पंक्तिश्छंदः सदाशिवो देवता पुरुषार्थचतुष्टयसिद्ध्य

र्थेजपेविनियोगः॥वामदेवायऋषयेनमः शिरसि ॥ १ ॥ पंक्तिच्छंदसे नमोमुखे ॥ २ ॥ सदाशिवायदेवतायैनमः हृदये ॥ ३ ॥ चतुर्विधपुरुषार्थसिद्ध्यर्थेजपेविनियोगः इतिकृतांजलिर्वदेत् ॥ ॐहृदयायनमः ॥ १ ॥ न शिरसेस्वाहा ॥ २ ॥ मः शिखायैवषट् ॥ ३ ॥ शि कवचायहुम् ॥४॥ वा नेत्रत्रयायवौषट् ॥५॥ य अस्त्रायफट् ॥६॥ स्तोत्रंपठेत् ॥ ओंकारंबिंदुसंयुक्तंनित्यंध्यायंतियोगिनः ॥ कामदंमोक्षदंचैवओंकारायनमोनमः ॥ १ ॥ नजातिर्नमृतिर्यस्यक्षयोयस्यनविद्यते॥ नमंतिदेवतास्सर्वानकारंतंनमाम्यहम् ॥२॥ महादेवंमहावक्त्रं महाध्यानपरायणम् ॥ महापापहरंदेवं मकारंतंनमाम्यहम् ॥ ३ ॥

शिवात्परतरोनास्तिशिवशास्त्रेषुनिश्चयः॥शमंतिसर्वपापानिशकारंतं
नमाम्यहम् ॥ ४ ॥ वाहनंवृषभोयस्यवासुकिःकंठभूषणम् ॥ वामेश
क्तिधरंदेवंवकारंतंनमाम्यहम् ॥ ५ ॥ यत्रयत्रास्थितोदेवःसर्वव्यापी
महेश्वरः॥योगुरुःसर्वदेवानांयकारंतंनमाम्यहम् ॥ ६ ॥ इदंषडक्षर
स्तोत्रंप्रातरुत्थाययःपठेत् ॥ मुच्यतेसर्वपापेभ्यः शिवलोकंसगच्छ
ति॥७॥इतिषडक्षरस्तोत्रम् ॥ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजा
तःपातिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्मैदेवायहवि
षाविधेम ॥१॥ आरात्रिपार्थिवꣳरजःपितुरप्रायिधामभिः ॥ दिवःस

दाᳪंसिबृहतीविंतिष्ठसऽआत्त्वेषवर्त्ततेतमः ॥ २ ॥ यज्ञेनयज्ञमयज
न्तदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्र
पूर्वेसाध्याःसंतिदेवाः ॥१॥ ॐ राजाधिराजायप्रसह्यसाहिने ॥ नमो
वयंवैश्रवणायकुर्महे ॥ १ ॥ समेकामान्कामकामायमह्यम् ॥ का
मेश्वरोवैश्रवणो ददातु कुबेरायवैश्रवणाय महाराजायनमः ॥
ॐ स्वस्ति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं
राज्यं महाराज्यमाधिपत्यमयं समंतपर्यायी स्यात् सार्वभौमः
सार्वायुषः (ष) आंतादापरार्धात् पृथिव्यै समुद्रपर्यंताया एकरा
डिति ॥ तदप्येष श्लोकोऽभिगीतो मरुतःपरिवेष्टारो मरुत्तस्यावसन्

गृहे ॥ आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥ ॥ ॥ ॥
ॐअग्निर्देवतावातोदेवतासूर्योदेवताचंद्रमादेवता वसवोदेवतारुद्रोदे
वतादित्यादेवतामरुतोदेवताविश्वेदेवादेवताबृहस्पतिर्देवतेंद्रो देवता
वरुणोदेवता ॥ १ ॥ मानोंमहान्तंमुतमानोंऽअर्भकम्मानऽउक्षन्तं
मुतमानंऽउक्षितम् ॥ मानोंवधीःपितरम्मोतमातरम्मानंःप्रियास्त
न्वोरुद्ररीरिषः ॥ १ ॥ मानंस्तोकेतनंयेमानऽआयुषिमानोगोषुमा
नोऽअश्वेषुरीरिषः ॥ मानोंवीरान्रुद्रभामिनोंवधीर्हविष्मन्तःसद
मित्वाहवामहे ॥ ॥ इतिवेदोक्तशिवार्चनम् ॥ ॥ ॥ ॥

॥ श्रीगणेशाय नमः ॥ ॐ नमो मृत्युञ्जयाय ॥ नंदिकेश्वर उवाच ॥ कैलासस्योत्तरे श्रृङ्गे शुद्धस्फटिकसन्निभे ॥ तमोगुणविहीने तु जरामृत्युविवर्जिते ॥ १ ॥ सर्वतीर्थास्पदाधारे सर्व्वज्ञानकृतालये ॥ कृतांजलिपुटो ब्रह्मा ध्यानशीलः सदाशिवम् ॥ २ ॥ पप्रच्छ प्रणतो भूत्वा जानुभ्यामवनिं गतः॥सर्वार्थसम्यगाधारं ब्रह्मा लोकपितामहः॥ ३ ॥ ब्रह्मोवाच ॥ केनोपायेन देवेश चिरायुर्लोमशोऽभवत् ॥ तन्मे ब्रूहि महेशान लोकानां हितकाम्यया ॥ ४ ॥ श्रीसदाशिव उवाच॥शृणु ब्रह्मन्प्रवक्ष्यामि चिरायुर्मुनिसत्तमः ॥ संजातः कर्म्मणा येन व्याधिमृत्युविवर्जितः ॥ ५ ॥ तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते ॥ कृतान्तभयनाशाय स्तुतो मृत्युंजयः शिवः ॥६॥ तस्य संकीर्तनान्नित्यं मुनिर्मृत्युविवर्जितः॥तमेव कीर्तयब्रह्मन्मृत्युं जेतुं न संशयः॥७॥

लोमश उवाच ॥ ॐ देवाधिदेव देवेश सर्वप्राणभृतां वर ॥ प्राणिनामपि नाथस्त्वं मृत्युंजय नमोऽस्तु ते ॥ ८ ॥ देहिनां जीवभूतोऽसि जीवो जीवस्य कारणम्॥जगतां रक्षकस्त्वं वै मृत्युंजय नमोऽस्तु ते ॥ ९ ॥ हिमाद्रिशिखराकार सुधावीचिमनोहर॥ पुण्डरीक परं ज्योतिर्मृत्युंजय नमोऽस्तु ते ॥१०॥ ध्यानाधार महाज्ञान सर्वज्ञानैककारण ॥ परित्राताऽसि लोकानां मृत्युंजय नमोऽस्तु ते ॥११॥ निहता येन कालेन सदेवासुरमानुषाः ॥गन्धर्वाप्सरसश्चैव सिद्धा विद्याधरास्तथा ॥ १२ ॥ साध्याश्च वसवो रुद्रास्तथाऽश्विनिसुतावुभौ ॥ मरुतश्च दिशो नागाः स्थावरा जङ्गमास्तथा ॥१३॥ जितः सोऽपि त्वया ध्यानान्मृत्युंजय नमोऽस्तु ते॥१४॥ये ध्यायंति परां मूर्तिं पूजयंत्यमराधिप ॥ न ते मृत्युवशं यांति मृत्युंजय नमोऽस्तु ते ॥ १५ ॥ त्वमोंकारोऽसि

वेदानां देवानां च सदाशिवः ॥ आधारशक्तिः शक्तीनां मृत्युंजय नमोऽस्तु ते॥१६॥ स्थावरे जंगमे वाऽपि यावत्तिष्ठति मेदिनी॥जीवत्वित्याह लोकोऽयं मृत्युंजय नमो ऽस्तु ते ॥ १७ ॥ सोमसूर्याग्निमध्यस्थ व्योमव्यापिन्सदाशिव ॥ कालत्रयमहाकाल मृत्युंजय नमोऽस्तु ते॥१८॥प्रबुद्धे चाप्रबुद्धे च त्वमेव सृजसे जगत्॥सृष्टिरूपेण देवेश मृत्युंजय नमोऽस्तु ते॥१९॥ व्योम्नि त्वं व्योमरूपोऽसि तेजः सर्वत्र तेजसि॥प्राणिनां ज्ञानरूपोऽसि मृत्युंजय नमोऽस्तु ते॥२०॥जगज्जीवो जगत्प्राणःस्रष्टा त्वं जगतःप्रभुः कारणं सर्वतीर्थानां मृत्युंजय नमोऽस्तु ते॥२१॥नेता त्वमिंद्रियाणां च सर्वज्ञानप्रबो धकः॥सांख्ययोगश्च हंसश्च मृत्युंजय नमोऽस्तु ते॥२२॥रूपातीतः सुरूपश्च पिंडस्थ पदमेव च॥चतुर्युगकलाधार मृत्युंजय नमोऽस्तु ते ॥२३॥ रेचके वह्निरूपोऽसि सोम

रूपोऽसि पूरके॥कुम्भके शिवरूपोऽसि मृत्युंजय नमोऽस्तु ते॥२४॥क्षयं करोषि पापानां पुण्यानामपि वर्धनम्॥हेतुस्त्वं श्रेयसान्नित्यं मृत्युंजय नमोऽस्तु ते॥२५॥सर्वमायाकलातीत सर्वेन्द्रियपरावर॥सर्वेन्द्रियकलाधीश मृत्युंजय नमोऽस्तु ते ॥२६॥रूपं गंधोरसःस्पर्शःशब्दसंस्कार एव च॥त्वत्तःप्रकाश एतेषां मृत्युंजय नमोऽस्तु ते॥२७॥ चतुर्विधानां सृष्टीनां हेतुस्त्वं कारणेश्वरः॥ भावाभावपरिच्छिन्न मृत्युंजय नमोऽस्तु ते ॥२८॥ त्वमेको निष्कलो लोके सकलं भुवनत्रयम्॥अतिसूक्ष्मातिरूपस्त्वं मृत्युंजय नमोऽस्तु ते ॥२९॥त्वं प्रबोधस्त्वमाधारस्त्वद्बीजं भुवनत्रयम्॥सत्त्वं रजस्तमस्त्वं हि मृत्युंजय नमोऽस्तु ते॥३०॥त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेःपरः॥अष्टात्रिंशत्कलानाथ मृत्युंजय नमोऽस्तु ते॥३१॥सर्वेन्द्रियाणामाधारःसर्वभूतगुणाशयः॥सर्वज्ञानम

यानंत मृत्युंजय नमोऽस्तु ते॥३२॥त्वमात्मा सर्वभूतानां गुणानां त्वमधीश्वरः॥ सर्वा
नन्दमयाधार मृत्युंजय नमोऽस्तु ते ॥३३॥ त्वं यज्ञःसर्वयज्ञानां त्वं बुद्धिर्बोधलक्षणा॥
शब्दब्रह्म त्वमोङ्कारो मृत्युंजय नमोऽस्तु ते॥३४॥श्रीसदाशिव उवाच॥एवं सङ्कीर्त
येद्यस्तु शुचिस्तद्गतमानसः॥भक्त्या शृणोति यो ब्रह्मन्न स मृत्युवशो भवेत्॥३५॥न
तु मृत्युभयं तस्य प्राप्तकालं च लंघयेत्॥अपमृत्युभयं तस्य प्रणश्यति न संशयः
॥३६॥व्याधयो नोपपद्यन्ते नोपसर्गभयं भवेत् ॥ प्रत्यासन्नान्तरे काले शतैकावर्त्तने
कृते ॥३७॥ मृत्युर्न जायते तस्य रोगान्मुंचति निश्चितम्॥पंचम्यां वा दशम्यां वा
पौर्णमास्यामथापि वा ॥३८॥ शतमावर्त्तयेद्यस्तु शतवर्षं स जीवति ॥ तेजस्वी बल
सम्पन्नो लभते श्रियमुत्तमाम् ॥ ३९ ॥ त्रिविधं नाशयेत्पापं मनोवाक्कायसम्भवम् ॥

अभिचाराणि कर्माणि कर्माण्याथर्वणानि च ॥ क्षीयन्ते नात्र संदेहो दुःस्वप्नं च विनश्यति ॥ ४० ॥ इदं रहस्यं परमं देवदेवस्य शूलिनः ॥ दुःस्वप्नप्रणाशनं पुण्यं सर्वविघ्नविनाशनम् ॥ ४१ ॥ इति श्रीशिवब्रह्मसंवादे श्रीमृत्युंजयस्तोत्रं संपूर्णम् ॥

॥ श्रीसदाशिवार्पणमस्तु ॥

इदं पुस्तकं मुम्बय्यां क्षेमराज--श्रीकृष्णदासश्रेष्ठिना स्वकीये "श्रीवेंकटेश्वर"
स्टीम्--यन्त्रागारे मुद्रितम्।

संवत् १९९०, शके १८५५.

पुस्तक मिलनेका ठिकाना--

खेमराज श्रीकृष्णदास,
"श्रीवेङ्कटेश्वर" स्टीम्--प्रेस,
बम्बई.

गङ्गाविष्णु श्रीकृष्णदास,
"लक्ष्मीवेङ्कटेश्वर" स्टीम्--प्रेस,
कल्याण--बम्बई.

॥ इति वेदोक्तशिवार्चनपद्धतिः समाप्ता ॥